CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

चौखम्भा राजसेवा ग्रन्थमाला

३१

अथ

देवीपुष्पाञ्जलिस्तोत्रम्

मोहिनीकवचसहितम्

चौखम्भा ओरियन्टालिया

वाराणसी दिल्ली

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशक

चौखम्भा ओरियन्टालिया

पो० आ० चौखम्भा, पो० बाक्स नं० ३२

गोकुल भवन, के० ३७/१०९, गोपाल मन्दिर लेन

वाराणसी–२२१००१ (भारत)

टेलीफोन : ६३०२२ टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू. बी. जवाहर नगर

दिल्ली–११०००७

© चौखम्भा ओरियन्टालिया

प्रथम संस्करण १९७८

मुद्रक—श्रीगोकुल मुद्रणालय, गोपाल मन्दिर लेन, वाराणसी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवीपुष्पाञ्जलिस्तोत्रम्

वालीयुतश्रवणपालीयुगा ललितचूलीविराजिवकुला
केलीगतानुगमरालीकुला मधुरनालीभिराहृतकथा ।
नालीकहृक्कुसुमनालीकपाणिरिह कालीयशासिसहजा
तालीदलाभतनुमाली सदा भवतु काली शुभाय मम सा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवीपुष्पाञ्जलिस्तोत्रम्

अयि गिरिनन्दिनि नन्दितमेदिनि, विश्वविनोदिनि नन्दिनुते ।
गिरिवरविन्ध्यशिरोधिनिवासिनि, विष्णुविलासिनि जिष्णुनुते।।
भगवति हे शितिकण्ठकुटुम्बिनि, भूरिकुटुम्बिनि भूतिकृते ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ।। १ ।।

सुरवरवर्षिणि दुर्धरधर्षिणि, दुर्मुखमर्षिणि हर्षरते ।
त्रिभुवनपोषिणि शङ्करतोषिणि कल्मषमोषिणि घोषरते ।।,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दनुजनिरोषिणि दुर्मदशोषिणि, दुर्मुनिरीषिणि सिन्धुसुते ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि, शैलसुते ॥२॥
अयि जगदम्ब ! कदम्बवनप्रियवासिनि तोषिणि हासरते ।
शिखरिशिरोमणितुङ्गहिमालयशृङ्गनिजालयमध्यगते ॥
मधुमधुरे मधुकैटभगञ्जिनि, महिषविदारिणि रासरते ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि, शैलसुते ॥३॥
अयि निजहुङ्कृतिमात्रनिराकृतधूम्रविलोचनधूम्रशते ।
समरविशोषितरोषितशोणितबोजसमुद्भवबीजलते ॥
शिव शिव शुम्भनिशुम्भमहाहवहर्षितभूतपिशाचपते ।
जय जय हे महिषासुरनर्दिनि रम्यकपर्दिनि शैलसुते ॥४॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अयि शतखण्डविखण्डितरुण्डवितुण्डितशुण्डगजाधिपते ।
निजभुजदण्डनिपातितचण्डविपाटितमुण्डभटाधिपते ॥
रिपुगजगण्डविदारणचण्डपराक्रमशौण्डमृगाधिपते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥५॥
धनुरनुषङ्गरणक्षणसङ्गपरिस्फुरदङ्गनटत्कटके ।
कनकपिशङ्गपृषत्कनिषङ्गरसद्भटशृङ्गहताबटुके ॥
हतचतुरङ्गबलक्षितिरङ्गघटद्बहुरङ्गरटद्बटुके ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥६॥
अयि रणदुर्मदशत्रुवधोद्धुरदुर्धरनिर्भरशक्तिभृते ।
चतुरविचारधुरीणमहाशयदूतकृतप्रमथाधिपते ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुरितदुरीहदुराशयदुर्मतिदानवदूतदुरन्तगते ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥७॥
अयि शरणागतवैरिवधूजनवीरवराभयदायिकरे ।
त्रिभुवनमस्तकशूलविरोधिशिरोधिकृतामलशूलकरे ॥
दुमिदुमितामरदुन्दुभिनादमहोर्मुखरीकृतदिङ्निकरे ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥८॥
सुरललनाततथेयितथेयितथाभिनयोत्तरनृत्यरते ।
कृतकुकुथः कुकुथो दिडदाडिकतालकुतूहलगानरते ॥
धुधुकुटधूधुटधिन्धिमितध्वनिधीरमृदङ्गनिनादरते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥९॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जय जय जाप्यजये जयशब्दपरस्तुतितत्परविश्वनुते ।
झण-झण झिञ्झिमझिङ्कृतनूपुरशिञ्जितमोहितभूतपते ॥
नटितनटार्धनटीनटनायकनाटननाटितनाट्यरते ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥१०॥
अयि सुमनःसुमनःसुमनःसुमनःसुमनोरमकान्तियुते ।
श्रितरजनीरजनीरजनीरजनीरजनीकरवक्त्रभृते ॥
सुनयनविभ्रमरभ्रमरभ्रमरभ्रमरभ्रमराभिवृते ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥११॥
महितमहाहवमल्लमतल्लिकवल्लितशल्लितभल्लिरते ।
विरचितवल्लिकपालिकपाल्लिकझिल्लिकझिल्लिकवर्गवृते ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रुतकृतफुल्लसमुल्लसितारुणतल्लजपल्लवसल्लसिते ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥१२॥
अयि सुदतीजनलालसमानसमोहनमन्मथराजसुते ।
अविरलगण्डगलन्मदमेदुरमत्तमतङ्गजराजगते ॥
त्रिभुवनभूषणभूतकलानिधिरूपपयोनिधिराजसुते ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥१३॥
कमलदलामलकोमलकान्तिकलाकलितामलभालतले ।
सकलविलासकलानिलयक्रमकेलिचलत्कलहंसकुले ॥
अलिकुलसंकुलकुन्तलमण्डलमौलिमिलद्बकुलालिकुले ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥१४॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

करमुरलीरववीजितकूजितलज्जितकोकिलमञ्जुमते ।
मिलितपुलिन्दमनोहरगुञ्जितरञ्जितशैलनिकुञ्जगते ॥
निजगणभूतमहाशबरीगणरङ्गणसम्भृतकेलिरते ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥१५॥
कटितटपीतदुकूलविचित्रमयूखतिरस्कृतचण्डरुचे ।
जितकनकाचलमौलिमदोर्जितगर्जितकुञ्जरकुम्भकुचे ॥
प्रणतसुरासुरमौलिमणिस्फुरदंशुलसन्नखचन्द्ररुचे ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥१६॥
विजितसहस्रकरैकसहस्रकरैकसहस्रकरैकनुते ।
कृतसुरतारकसङ्गरतारकसङ्गरतारकसूनुनुते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुरथसमाधिसमानसमाधिसमानसमाधिसुजाप्यरते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१७॥
पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं सुशिवे ।
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ॥
तव पदमेव परमपदमस्त्विति शीलयतो मम किं शिवे ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥ १८॥
कनकलसत्कलशीकजलैरनुषिञ्चति तेऽङ्घ्रणरङ्घ्रभुवम् ।
भजति स किं न शचीकुचकुम्भनटीपरिरम्भसुखानुभवम् ॥
तव चरणं शरणं करवाणि, सुवाणिपथं मम देहि शिवम् ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥१९॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तव विमलेन्दुकलं, बदनेन्दुमलं, कलयन्ननुकूलयते ।
किमु पुरुहूतपुरीन्दुमुखीसुमुखीभिरसौ विमुखीक्रियते ॥

मम तु मतं शिवमानधने भवती कृपया किमु न क्रियते ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥२०॥

अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे ।
अयि जगतो जननीति यथासि मयापि तथानुमतासि रमे ॥

यदुचितमत्रभवत्पुरगं कुरु शाम्भवि देवी दयां कुरु मे ।
जय जय हे महिषासुरमर्दिनि, रम्यकपर्दिनि शैलसुते ॥२१॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तुतिमिमां स्तिमितः सुसमाधिना,
नियमतो यमतोऽनुदिनं पठेत् ।
परमया रमया स निषेव्यते,
परिजनोऽरिजनोऽपि च तं भजेत् ॥२२॥

इति श्रीशङ्कराचार्यविरचितं देवीपुष्पाञ्जलिस्तोत्रं समाप्तम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मोहिनीं कवचम्

॥ श्रीगणेशाय नमः ॥

भगवन् सर्वधर्मज्ञ सर्वागमविशारद ।
कवचं देवतायास्तु कृपया कथय प्रभो ॥ १ ॥

ब्रह्मोवाच

शृणु देव महाप्राज्ञ सर्वशास्त्रविशारद ।
कवचं मोहिनीदेव्या महासिद्धिकरं परम् ॥ २ ॥
मोहिनी मे शिरः पातु भालं नेत्रयुगं तथा ।
भ्रुवौ च कामिनी रक्षेन्मुखं वागीश्वरी तथा ॥ ३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रोत्रे मंगलरूपा च कण्ठं महिषमर्दिनी ।
भुजौ सौन्दर्यनिलया हस्तौ रक्षेद्यशस्विनी ॥ ४ ॥
सर्वदा नाभिदेशे तु कमला पातु चोदरम् ।
विजया हृदयं पातु कटिं सुरवरार्चिता ॥ ५ ॥
करौमहालया रक्षेदंगुलीर्भक्तवत्सला ।
वैष्णवी पातु जंघे च माया मेढ्रं गुदं तथा ॥ ६ ॥
पादौ च देवजननी तलं पातालवासिनी ।
पूर्वे तु मोहिनी रक्षेद्दक्षिणे सुखदायिनी ॥ ७ ॥
पश्चिमे वारुणी रक्षेदुत्तरेऽमृतवासिनी ।
ईशान्यां पातु चेशानी आग्नेय्यामग्निदेवता ॥ ८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नैर्ऋत्यां खड्गधृग्देवी वायव्यां मृगवाहिनी ।
ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ॥ ९ ॥
अग्रतः पातु चेन्द्राणी वाराही पृष्ठतस्तथा ।
कौबेरी चोत्तरे पातु दक्षिणे विष्णुवल्लभा ॥ १० ॥
इदं कवचमज्ञात्वा यो भजेन्मोहिनीं नरः ।
वृथा श्रमो भवेत्तस्य न मन्त्रः सिद्धिदायकः ॥ ११ ॥
भूर्जपत्रे समालिख्य कुंकुमादिकचन्दनैः ।
शतमष्टोत्तरं जाप्यं स्वर्णस्थं धार्यते यदि ॥ १२ ॥
कण्ठे वा दक्षिणे बाहावष्टसिद्धिर्भवेद्ध्रुवम् ।
सर्वथा सर्वदा नित्यं जपेमोहिनिकं तथा ॥ १३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राजद्वारे सभास्थाने कारागृहनिबन्धने ।
जलमध्ये चाग्निमध्ये तथा निर्जनके वने ॥ १४ ॥
अरण्ये प्रान्तरे घोरे शत्रुसंघे महाहवे ।
शस्त्रघाते विषे पीते जपन् सिद्धिमवाप्नुयात् ॥ १५ ॥
ब्रह्मराक्षसवेताला: कूष्माण्डा भैरवादय: ।
नश्यन्ति दर्दनात्तस्य कवचे हृदि संस्थिते ॥ ३६ ॥
मनसा चिन्तितं कार्यं सहस्रं जपतस्तथा ।
पलाशमूले प्रजपेत्सहस्रत्रितयं मुदा ॥ २७ ॥
शत्रुहानिर्ध्रुवं चात्र जायते नात्र संशय: ।
अर्कमूले जपेन्नित्यं मन्त्रराजमिमं शुभम् ॥ १८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भोजयेद्ब्राह्मणांश्चैव लक्ष्मीर्वसति सर्वदा ।
यदिदं कवचं नित्यं भक्त्या तव मयोदितम् ॥ १९ ॥
यो जपेत्सर्वदा भक्त्या मोहिन्याः कवचं शुभम् ।
वांछितं फलमाप्नोति नात्र कार्या विचारणा ॥ २० ॥

इति श्रीभविष्योत्तरपुराणे ब्रह्मप्रोक्तं मोहिनीकवचं स्तोत्रं सम्पूर्णम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तोत्र-ग्रन्थाः

१ आदित्यहृदयस्तोत्रम् । आदित्यस्तोत्रम्, सूर्यप्रातःस्मरणम्, सूर्यकवच-स्तोत्रम्, त्रैलोक्यमङ्गलसूर्यकवचम्, सूर्यस्तवराजश्च सहितम् ०—५०

२ श्रीहनुमान चालीसा । सङ्कटमोचनहनुमानाष्टकम्, हनुमत्पञ्चरत्नस्तोत्रम्, हनुमदष्टकम्, एकादशमुखहनुमत्कवचम्, बजरङ्ग बाण, श्रीरामस्तुति, श्रीरामावतार-स्तुति तथा आरती श्रीहनुमान लला की ०—५०

३ श्रीमद्भगवद्गीता-श्रीविष्णुसहस्रनामस्तोत्रम् सहित । मूलमात्र (गुटका संस्करण) ०—५०

४ श्रीमद्भगवद्गीता । भाषाटीका (गुटका संस्करण) हिन्दीव्याख्याकार—श्री कन्हैया लाल जोशी ३—५०

५ श्रीविष्णुसहस्रनामस्तोत्रम् । (नामावलीसहितम्) ०—७५

६ शुक्लयजुर्वेदीयरुद्राष्टाध्यायी (कर्मकाण्ड) । शिवापराधक्षमापनस्तोत्रम्, शिवपञ्चाक्षरस्तोत्रम् तथा शिवषडक्षरस्तोत्रसहितञ्च । सम्पादक—आचार्य ऋषि शङ्कर अग्निहोत्री । १—५०

प्राप्तिस्थान—चौखम्भा ओरियन्टालिया, वाराणसी, दिल्ली

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति

देवीपुष्पाञ्जलिस्तोत्रम्

समाप्तम्

अन्य प्राप्तिस्थान

चौखम्भा विश्वभारती

चौक (चित्रा सिनेमा के सामने)

वाराणसी-२२१००१

फोन : ६५४४४